नानुवर्तिष्यते ? सैवाननुवृत्तिः शब्देनाख्यायते प्रयत्नाधिक्येन पूर्वसूत्रेऽपि सम्बन्धार्थम् । हैमन्तिकम् इति भाषायामपि ठञं स्मरन्ति । [1]अथ अण् च इति चकारः किमर्थः ? अण्, यथाप्राप्तं च ऋत्वण् इति[2] । कः पुनरनयो-[3]विशेषः ? ऋत्वणि हि तकारलोपो नास्ति हैमन्ती पङ्क्तिः (म. भा. २.३०४) इति । तदेवं त्रीणि रूपाणि भवन्ति, 'हैमन्तिकम्' (तै.४.४.११.१), 'हैमन्तम्' (पै. १७.१९.११), '[4]हैमनम्' (अ.वे.१५.४.१४) इति ॥

## सायंचिरंप्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च । (२३/१३०१)

कालात् इत्येव । सायं चिरं प्राह्णे प्रगे इत्येतेभ्यः अव्ययेभ्यश्च कालवाचिभ्यः ट्युट्युलौ प्रत्ययौ भवतः, तयोश्चादिष्टयोः तुडागमो भवति । सायन्तनम् । चिरन्तनम् । प्राह्णेतनम् । प्रगेतनम् । अव्ययेभ्यः – दोषातनम् । दिवातनम्[5] । सायम् इति मकारान्तं पदमव्ययम्, ततोऽव्ययादेव सिद्धः प्रत्ययः । [6]यस्तु स्यतेरन्तकर्मणो घञि सायशब्दस्तस्येदं मकारान्तत्वं प्रत्ययसन्नियोगेन निपात्यते । दिवसावसानं [7]सायः । चिरशब्दस्यापि मकारान्तत्वं निपात्यते । प्राह्णे, प्रगे [8]इत्येकारान्तत्वम्[9] ।

[४४६] चिरपरुत्परारिभ्यस्त्नो वक्तव्यः । (म. भा. २.३०४)

चिरत्नम् । परुत्नम् । परारित्नम् ।

[४४७] प्रगस्य छन्दसि गलोपश्च । (म.भा.२.३०४)

'प्रत्नम्' (ऋ.१.३६.४) ।

[४४८] अग्रपश्चाड्डिमच् । (म. भा. २.३०४)

अग्रिमम् । पश्चिमम् ।

[४४९] अन्ताच्चेति वक्तव्यम् । (म. भा. २. ३०४)

अन्तिमम् ॥

## विभाषा पूर्वाह्णापराह्णाभ्याम् । (२४/१३०२)

पूर्वाह्णापराह्णशब्दाभ्यां विभाषा ट्युट्युलौ प्रत्ययौ भवतः, [10]तुट् च तयोरागमः । 'कालाट् ठञ्' (४.३.११/१३८१) इति ठञि प्राप्ते वचनं, पक्षे सोऽपि भवति । पूर्वाह्णेतनम् । अपराह्णेतनम् । पौर्वाह्णिकम् । आपराह्णिकम् । 'घकालतनेषु कालनाम्नः' (६.३.१७/९७५) इति सप्तम्या अलुक् । यदा तु न सप्तमी समर्थविभक्तिः पूर्वाह्णः सोढः अस्य इति तदा पूर्वाह्णतनः[11] इति भवितव्यम् ॥

---

1. तथा अण् एव च क. 2. किम् इत्यधिकम् फ. 3. अणोः इत्यधिकम् ह. 4. हैमतम् ब, हिमनम् क. 5. श्वस्तनम् इत्यधिकम् फ. 6. अत्रतु फ, कालवाचिनामित्येव इत्यधिकम् क. 7. सायम् फ. 8. इत्येतयोः फ. 9. निपातनात् इत्यधिकम् फ, निपात्यते इत्यधिकम् ह. 10. तुट् च नास्ति फ. ह. 11. अपराह्णतनः इत्यधिकम् ह. क.